In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

उत्तर प्रदेश संस्कृत अकादमी लखनऊ

के

अध्यक्ष

पं० करुणापति त्रिपाठी

का

स्वागत भाषण

पुरस्कार वितरण समारोह

१९८२

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

उत्तरप्रदेशसंस्कृत–अकादस्या लक्ष्मणपुरस्थायाः अध्यक्षस्य करुणापतित्रिपाठिनः पुरस्कारवितरणसमारोहावसरे

स्वागतभाषणम्

अयि मान्यमान्याः श्रीमन्तः महामहिमराज्यपालमाहाभागा विशालस्य उत्तरप्रदेशस्य राष्ट्रहृदयस्थानीयस्य माननीया मुख्यमन्त्रि महोदयाः, माननीयाः शिक्षामंत्रिमहोदयाः अन्ये च समुपस्थिताः प्रदेशमन्त्रिमण्डलसदस्याः श्रौतवाङ्-मयपारायणसमर्पितजीवनाः वैदिकविद्वांसः नानाशास्त्रनदीष्णाः विचक्षणगणाः समुपस्थिता अधिकारिणः, उत्तरप्रदेशसंस्कृताकादमीसदस्या अकादम्यधि-कारिणः, संस्कृत सेवकाः सज्जनाः संस्कृतानुरागिण्यो देव्यश्च !

अहमद्य उत्तरप्रदेशसंस्कृताकादम्याः पक्षेण अस्मिन् पुरस्कारवितरण-समारोहे समवेतान् समुपस्थितान् सर्वान् लोकान् प्रति सविनयं सहर्ष सोल्लासं हार्दिकं च स्वागतम् व्याहरामि । अथ च अस्मिन् स्वागतसमर्पणे अतीव प्रमोदमनुभवामि । विश्वभाषारूपेण भूमण्डले देदीप्यमानाया एतस्या संस्कृत गीर्वाणवाण्याः मुख्यतः सर्वेषु विकसितराष्ट्रेषु बहुषु च विकासशील-देशेषु अध्ययनाध्यापनगवेषणानुशीलनानि विश्वविश्रुतैः समस्तजीवन-पर्यन्तसंस्कृताध्ययनशीलैः कोविदैः महता प्रयासेन सम्पाद्यन्ते । भारतभूमौ च अस्याः सुरभारत्याः प्रोगैतिहासिककालाद् अद्य यावत् अध्ययनाध्यापनादीनाम् अविच्छिन्ना अप्रतिरुद्धा परम्परा प्रचलन्ती विद्यते । आदिकालतः एव एनां भाषां प्रति लोकेलोकानां एतादृशी आदरमयी, श्रद्धामयी, पूज्यभावमयी भावना आसीत् यत् एतस्या विज्ञातारः एतस्यां भाषायां च भाषण निष्णाताः अध्यापकाः छात्राः सर्वे पूज्यभावनाया समादरभाजनानि अभूवन् ।

अद्यापि राष्ट्रस्य बहुलसंख्यकानां पाठकानां अल्पपाठकानां निरक्षराणां च पूर्ववदेव अमूं गिरंप्रति आदरमयी आस्था विद्यते । यत्र तत्र च केचन

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आधुनिकभावनाभाविताः स्वाभिमानविरहिताः आत्मविस्मृताः भारतीयाः एनां भाषां प्रति एतद्वाणीपठनपाठनशीलान् छात्राध्यापकविदुषः प्रति अवहेलनाबुद्ध्या विलोकयन्ति । तथोक्ता आधुनिकाः तान् प्रतिगामिनः अन्धविश्वासपारायणा इत्यादि शब्दैः तान्प्रति स्वकीयं भावं प्रकटयन्ति । किन्तु तथाकथितप्रगतिवादिनां—भारतीयसंस्कारपराङ्मुखानां वादा अयथार्थप्रलापा एव ।

अस्माकं मध्ये ये वैदिकपण्डिताः ते भूयोभूयः प्रशंसनीयाः । अस्मद्राष्ट्रस्य यः प्राचीनतमः पूज्यतमः महिष्ठः वरिष्ठः पुरातनतमः प्रागैतिहासिकः वैदिकनिधिः स एभिः अविच्छिन्नगुरुमुखपरम्पराप्राप्तशिक्षणैः अद्ययावद् महता आयासेन प्रयासेन तपसा निष्ठया च विशुद्धछन्दः स्वरावरोहारोह पाठैः पदक्रमजटामालाघनादिविकृतिपाठादिभिश्च सुरक्षितः । अद्यापि च इमे पण्डिता सस्वरविकृतिपाठसंहितामंत्राणां कण्ठस्थपाठक्षमा अतएव च समादरणीया वन्दनीयाश्च ।

संस्कृतवाङ्मयस्य वैशाल्यं प्रायः सर्वे संस्कृतानुरागिणो जानन्त्येव । अस्य वाङ्मयस्य विस्तारपरिधिमजानन्तः जनाः एतद् वाङ्मयं मुख्यतः आध्यात्मिक - पारमार्थिक - दार्शनिक - साहित्यिक - धार्मिक विषयकमात्रमेवेति बहुधा घोषयन्ति । केचन पाश्चात्याः विद्वांसः तदनुगामिनः भारतीयाश्च कौटिल्यार्थशास्त्रस्य अनुपलब्धत्वात् तत्पुस्तकं न जानन्ति स्म सत्युपलब्धे च कौटिल्यार्थशास्त्रे तैर्ज्ञातं यत् भारतीयवाङ्मये अर्थशास्त्रमपि विद्यते । असौ अर्थशास्त्रग्रन्थश्च समग्रभारतीयराजनीत्यर्थनीतिशासनपद्धत्यादिविषयादीन् अधिकृत्य रचित आसीत् । तस्मिन् अर्थशास्त्रे बहुत्र च मन्वादिधर्मसंहिताभिन्ना दण्डनीत्यादिशासनपरकविचारा निरूपिताः । धर्ममोक्षविषयकविवेचनभिन्नानि अनेकानि कामार्थ-विषयकचिन्तनानि कलाज्योतिर्विज्ञाननक्षत्रविज्ञानायुर्विज्ञानस्थापत्यकलाकृषिवाणिज्यवनस्पतिशास्त्रादिविषयक चिन्तनानि सम्यक् विवेचितानि तत्तद्विषयकग्रन्थेषु । पुराणोपपुराणादिषु पुराणेतरसम्बद्ध- वाङ्मयेषु प्रकरणादिग्रन्थेषु च विस्तरेण समग्रमानवजीवन संबद्धज्ञानानि सम्यग्निरूपितान्यनुशीलितानि च वर्तन्ते । महाभारते शान्तिपर्वणि-अनुशासनपर्वणि अन्यत्र च नजाने कियतां सन्दर्भणां समावेशः वर्तते इत्थञ्च संस्कृतवाङ्मयम् अलौकिक-पारमार्थिकाध्यात्मिक नैर्वाणिकविषयैः सह तद्युगीनलौकिकावश्यकतापरकसमस्तप्रसङ्गनिरूपकमासीत् । तत्तद्ग्रन्थेषु तेषां तेषां विषयाणां नीतिनिर्देशोऽपि कृतोऽस्ति ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यद्यपि पाश्चात्यविद्वद्भिः भारते स्वशासनारम्भकालादेव भारतीय-प्राचीनवाङ्मयस्य विशेषतः वैदिकवैदिकेतरवाङ्मयस्य ग्रन्थानां सम्यक्विवेचनानुसंधानुशीलनादीनि महता प्रयासेन वैज्ञानिकदृष्ट्या च सम्पादितानि तथापि तेषां मतानि केवल राजनीतिविषये एव न पूर्वाग्रहयुक्तदृष्ट्या निर्धारितानि अपितु तेषां भारतीयशास्त्रचिन्तनपद्धतिरपि प्रायशः भारतीयपारम्परिकदृष्टीतर पद्धत्या अंशतः विकृतरूपेण भारतीयानां विश्वस्य च पुरतः समुपस्थापितानि । तदनुसरणशीला केचन भारतीया अपि पाश्चात्यप्रस्थापितमान्यतानुगामिनो भवन्ति तानि स्थापितानि एव उररीकुर्वन्ति ।

स्वतन्त्रता-प्राप्त्यन्तरम्-भारतीयवाङ्मयानुशीलनतत्पराणां कृते सर्वतोधिकमेतत् कर्तव्यमावश्यकम् अवर्त्तत वर्तते च यत् पाश्चात्यानुशीलितमान्यतानां संस्कृतानुशीलनशीला भारतीयाः - भारतीयसंस्कृतिपरम्पराप्रज्ञाया भारतीयमान्यतानुयायिदृष्ट्या पूर्वाग्रहरहितदृष्ट्या च तत्तन्मान्यतानां शुद्धयर्थतत्त्वपरकनवीनदृष्ट्या परिष्कारसंशोधनपूर्वकसमीक्षणमनुशीलनं च कुर्युः ।

केचन प्रवदन्ति यत् प्राचीनभारते संस्कृतवाङ्मये च वैज्ञानिकदृष्ट्या वैज्ञानिकवाङ्मयस्य अभावः दरीदृश्यते स्म । परन्तु तथ्यविपरीतमेतत् । गणितशास्त्रे भारतस्य वैज्ञानिकीदृष्टिराकलना च अद्भुतासीत् । रेखागणितस्य ज्ञानं विज्ञानं च वैदिककालादेव लक्ष्यते । यज्ञवेदिकानिर्माणे रेखागणित ज्ञानस्य सूक्ष्मत्वं वर्णितम्वर्तते । खगोलविज्ञाने आर्यभट्ट - वाराहमिहिर-भास्कराचार्यादीनां पाश्चात्याः विद्वांस अपि वैज्ञानिकत्वमपि भूयोभूयोऽद्यापि घोषयन्ति । बीजगणितस्य दशमलवसिद्धान्तस्य च जन्म एतस्मिन्नेव राष्ट्रे अजायत । अङ्कानां ज्ञानं च भारतादेव अरबदेशमाध्यमेन विश्वेषु विश्वदेशेषु प्राचलत् । आयुर्विज्ञानस्य प्राचीनवैभवं निखिलेषु विश्वदेशेषु चरकसुश्रुतादिग्रन्थमाध्यमेन विज्ञातं वर्तते । वर्षा-विज्ञानादि-खगोलविज्ञानादि-विषयकाणि तथ्यानि यान्त्रिकसमृद्धिरहितेऽपि सुदूरे प्राक्तनकाले भारतीयैः स्वकीयनिरीक्षणपरिरक्षणैः तत्तदग्रन्थेषु पुराणादिषु च सविवरणम् वर्णितानि । किं बहुना चिकित्साविज्ञाने ताम्रलोहस्वर्णादिरसाख्यतत्त्वानां भस्मीकरणं अद्यापि औषधविज्ञानदृष्ट्या अतीव विस्मयावहम् । समस्तार्यभाषाया प्रथमः कोशग्रन्थः व्युत्पत्तिनिर्वचनग्रन्थश्च यास्कमुनिप्रणीते निरुक्ताख्ये पुस्तके परिलक्ष्यते । वैज्ञानिकभाषाध्ययन सम्बन्धि व्याकरणविषयकाध्ययने यास्क-पाणिनि-कात्यायनपतञ्जल्यादीनां नामानि अद्यापि शिरोमणिभूतानि सर्वैः समुद्घोष्यन्ते ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अपरञ्च विकसितदेशा भौतिकतकनीकीरासायनिक-यांत्रिकादि-विविध-विज्ञानेषु अद्य एतादृशः समृद्धिमन्तो जाता यत्ते स्वकीय प्रज्ञावलेन चन्द्रलोक धरातले अपि पदनिक्षेपं कर्तुम् समर्थाः अन्तरिक्षोपग्रहादिबलेन च सूदूरवर्तिनां शुक्रशनिगुरुबुधादिग्रहाणां परिधि-तत्तद्ग्रहसम्बन्धिज्ञानाकलनं कर्तुमपि क्षमाः। तेषां ग्रहादीनाम् अनुशीलनं कुर्वाणाश्च दृश्यन्ते। धनसमृद्धि-वैज्ञानिक सुविधादृष्ट्या च तेषां सर्वविधवैभवं कल्पनातीतं सजातम्। तथापि ते मानसिक सुखशान्ति-विरहिताः मनोविकारग्रस्ताः कुण्ठासंत्रासत्रस्ताः मस्तिष्कसम्बन्धा-तति (मानसिक तनाव = Mental-Tention) व्यथिता मादकद्रव्यादि सेवनसाधनेन मनःशान्तिमभिलषन्ति। परन्तु एभिः मनोरोगशामकविकृतो-पायैस्ते व्यथयन्तितरामेव।

बहवः यूरोपीया अमेरिकादिवासिनश्च जनाः अशान्ताः सन्तः मानसिक-शान्त्यै विदेशगतभारतीयानां ज्ञानभक्तिभजनोपदेशकानां आश्रमानाश्रयन्ति तेषां संस्थानानि च मानसिकाधिव्यथापहरणाय सोत्सुकदृष्टिभिः अवलोकयन्ति।

एतस्य एतदेव कारणं यत् तेषां प्रज्ञाबुद्धिवर्धनमसीमितं जातम्। तेषां हृदयानि चाद्यापि आदिमप्रवृत्युल्बणानि। जनानां कल्याणाय शिवाय यथार्थो-न्नत्यै च एतद् किलानिवार्यरूपेण आवश्यकं यत् यथा यथा बुद्धि-बलवृद्धि-र्नीयते, शक्तिवर्धनं भवेत्, समृद्धि-प्राचुर्यञ्च जायेत तथा तथा हृदयस्य मनो-भावना मानवीयधृतिक्षमादिविविधगुणान्तं च परिष्कारः संस्कारच भवेताम्। तदैव मानवस्य सन्तुलितसर्वजनहितसाधकसर्वमानवसुखदायकः सर्वलोक-कल्याणकारकः शिवमयः विकासः सम्भवति।

एतदर्थञ्च अनेकविकसित देशे वैदेशिकाः संस्कृतवाङ्मयं प्रति समुत्सुक-मनसा प्रेक्षमाणाः वर्तन्ते। भारतीयसंस्कृतिः संस्कृतम् भारतीयवाङ्मयं च एतत् कर्तुमद्यापि शक्नुवन्ति। अत एव सर्वैः भारतीयैः गतिशीलसांस्कृतिकपर-म्परानुसारिभिः संस्कृतभाषानिबद्धलोकमंगलकारिदृष्ट्या एतस्याः भाषायाः भारतीयसंस्कृत्याः संस्कृतवाङ्मयस्य च प्रचारः प्रसारश्च करणीयौ।

एतेन मङ्गलमयोद्देश्येन उत्तरप्रदेशसंस्कृताकादम्या प्रयतितव्यम्। एषा अकादमी संस्कृतप्रचारप्रसार-शास्त्रचिन्तन-सम्बंन्धीनि संस्कृतमाण्डलिकसम्मेलना निसम्पादितानि। तीर्थराजे प्रयागे अर्धकुम्भावरे महतासमारोहेण त्रैदिवसः समारोहोऽभवत उत्तरप्रदेशराजधन्यां लक्ष्मणपुरनगर्यां वार्षिकसमारोहोऽभूत्। अनेके मंत्रिमण्डलसदस्यैः अधिकारिभिश्च उद्घाटनादिनि कार्याणि सम्पादितानि।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तस्मिन्नवसरे भदृनारायणकृतवेणीसंहारनाटकस्य उपाध्यक्षस्याकादम्याः डा० शिवशेखरमिश्रस्य निर्देशकत्वे मञ्चनम् बभूव। एतन्मञ्चनं दर्शकाः प्रशंसितवन्तः शारदमहोंत्सवावसरे च नैनीतालक्षेत्रेऽपि अकादमी तथैव मञ्चनेम् कृत्वा महतीं प्रशसामलभत। पवित्रेसरयूपुलिनपरिसरे रामजन्ममूमि-पावनीकृते अयोध्यातीर्थे दिनत्रयावाधिकः अतीव मनोरमः माण्डलिकसम्मेलनकायंक्रमः सम्पन्नः। नैमिषारण्ये च 'व्यासजयन्ती' प्रयुक्तं अतीवोल्लाससहितम् विद्वद्गणसमुत्साहकं जनावर्जकं च अधिवेशनं दिनद्वयपर्यन्तमभवत्। वारणस्यां च पूर्ववर्षवत् श्रावणीपर्वणि संस्कृतदिवसप्रयुक्तसम्मेलनं दिनत्रये अभवत्। हरिद्वारे च अतीव रोचकं मेरठमाण्डलिकं सम्मेलनं गरीवदासीये संस्कृतमहाविद्यालये निर्धननिकेतने च द्विदिनावधिकम् सम्पन्नम्। कुमायूं-मण्डल-क्षेत्रेऽपि एक दिवसीयम् माण्डलिक-सम्मेलनं जातम्। यत्रमाण्डलिकबृहद्गोष्ठी सम्पन्ना।

इयम् अकादमी संस्कृतवाङ्मयस्य प्रचाराय, प्रसाराय-संवर्धनाय, संरक्षणाय च यथाशक्ति बद्धपरिकरा वर्तते। स्थापनाकालादेव एनया वहूनि कार्याणि सम्पादितानि। एषा अकादमी वैदिकवाङ्मयस्य समाराधनसमर्पित-जीवान् वेदयारायणनिपुणान् प्रोदेशिक वैदिकविचक्षणान् दशसंख्यकान् प्रतिवर्षं पुरस्कारसमर्पणेन सन्मानयति। वृद्धविपन्नेन्यः लब्धावकाशेभ्यः परम्परागत-संस्कृतपण्डितेभ्यः आर्थिकसाहाय्यं ददाति। संस्कृतपत्रपत्रिकाणांमार्थिक साहा-य्यानुदानेन तासां प्रचाराय प्रसाराय प्रयतते। उत्तरप्रदेशस्थ-सार्वजनिक-पुस्तकालयेभ्यः संस्कृतसाहित्यग्रन्थसवर्धनाय पुस्तकानुदांन च एषा अकादमी वितरति। उत्तरप्रदेशे संस्कृतसम्बन्धि-प्रकाशितानां पुस्तकानां पुरस्कारयोग्येभ्यः लेखकेभ्यः पुरस्कारसमितिसंस्तुत्या यथानियमं पुस्कारान् समर्पयति। प्रदेशीय-संस्कृतलेखकेभ्यः प्रोत्साहनाय उत्कृष्ट-पाण्डुलिपीनां प्रकाशनार्थं चापि अकादमी आंशिकानुदानं प्रददाति।

अकादम्याः प्रकाशनयोजनापि वर्तते। पं० नेहरूलिखितायाः 'आत्मकथायाः' श्री कमलापतिमिश्रकृत संस्कृता-नुवादरूपोऽपि ग्रन्थः शीघ्रमेवप्रकाशितो भविष्यति। गोपालशास्त्रिदर्शनकेसरिभिः अष्टाध्यायिसूत्रक्रमानुसारि संस्कृत-भाषाशिक्षणप्रयोगसमर्थितम्ऋजुपाणिनीयम् पुस्तकंप्रकाशनयोजना विचाराय स्वीकृताऽस्ति।

पाण्डुलिपिसंग्रहकार्यस्यापिअस्माकं विचारः। पाण्डुलिपि सर्वेक्षणकार्य-क्रमस्य महत्त्वमङ्गीकृत्य उत्तरप्रदेशसंस्कृताकादमी पाण्डुलिपिसर्वेक्षण कार्यक्रम-योजनां प्रचालितवती। सम्प्रति हरिद्वार गोरक्षपुर-वाराणसीनगरीषु अकादमी-सर्वेक्षकाः पण्डितानां गृहं-गृहं गत्वा सर्वेक्षणकार्यं सम्पादयन्ति। अकादमीसर्वेक्षकैः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अनेके महत्त्वपूर्णा ग्रन्थाः सर्वेक्षणप्रसङ्गे समुपलब्धा येषां सूचनाःसर्वेक्षकैः एकत्री-क्रियन्ते। भारतस्य संस्कृतिराजधान्यां वाराणस्यां सर्वाधिकाः पाण्डुलिपयः अद्यापि वर्तन्ते। तासां सर्वासां लेखबद्धसूचनाः सर्वेक्षकाः संकलयमानाः सन्ति। अद्यापि कार्यं प्रचलति।

अन्यान्यपि बहूनि योजनानि विचारितानि विद्यन्ते सत्यां भवनस्थान-धनविषयकसुविधायां शीघ्रमेव प्रचलिष्यन्ति। हस्तलिखितपुरातनसंस्कृतग्रन्थ-संग्रहः तेषां ग्रन्थानां सम्यक्संरक्षणम् संस्कृतवाङ्मयानुसन्धानपीठास्थापन मनुसंधानपीठोपयोगिसंस्कृतसंकृतेतरभाषालिखितप्रकाशितानां ग्रन्थानां पुस्तकालयस्थापना च। बालानां कृते प्रौढ़ानां कृते च सरलरोचकपद्धत्या शिक्षणस्य यथाशक्तिसञ्चालनमादि-प्रचलति। धनसुविधायां सत्यां सर्वकार्य-क्रमस्य विस्तारो भविष्यति।

इयं च उत्तरप्रदेशसंस्कृताकादमी संस्कृतवाङ्मयप्रचाराय-प्रसाराय च सर्वथा बद्धपरिकरा वर्तते।

अस्माकं कार्यसञ्चालनकालः अद्य यावद् यद्यपि वर्षद्वयादपि न्यूनः तथापि अकादमीकार्यसमितिसदस्याः यावतोत्साहेन मनोयोगेन यया आस्थया यैश्च प्रयासैः सर्वकार्यसम्पादन-साहाय्यभूतैः माम् अनुगृहीतवन्तः तेषामेव चाग्रेऽपि सहयोगेन एवद् सर्वम् सष्ठुतरं सम्पन्नम् भविष्यति।

वयं महामहिमराज्यपालमहोदयैः अनुगृहीता यत्तैः व्यस्तेऽपि स्वकीयकार्य-क्रमे समारोहस्यास्याध्यक्षपदकर्तव्यनिर्वाहाय अनुमतिः प्रदत्ता। अहम् अकादमी सदस्यैः अधिकारिभिश्च सह महमहिमराज्यपालमहोदयान् मंत्रिमण्डल-सदस्यान् प्रतिआभारवानस्मि। अन्ते च पूर्वोक्तान् सवनि् प्रति वैदिकविदुषः संस्कृतपण्डितांश्च प्रति अथ च सवनि् समागतान् संस्कृतानुरागिणः प्रति भूयोभूयः स्वागतम् व्याहरन् तान् अभिनन्दामि।

स्वागतकर्त्ता—
करुणापतिः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्वागत-भाषण

परमादरणीय महामहिम राज्यपाल महोदय, महामान्य मुख्यमन्त्री महोदय माननीया शिक्षा मन्त्री जी, उपस्थित प्रदेश मन्त्रिमण्डल सदस्य, श्रौत वाङ्मय पारंगत वैदिक विद्वद्जन, समुपस्थित अधिकारिवृन्द, उत्तर प्रदेश संस्कृत अकादमी के सदस्यगण, संस्कृत-सेवक-सज्जन एवं संस्कृतानुरागी तथा देवियों !

मैं आज उत्तर प्रदेश संस्कृत अकादमी की ओर से इस पुरस्कार वितरण समारोह में सम्मिलित एवं समुपस्थित सभी लोगों का हार्दिक स्वागत करता हूं। इस अवसर पर स्वागत करता हुआ मैं अत्यधिक प्रसन्नता का अनुभव कर रहा हूं। भूमण्डल के सभी विकसित राष्ट्रों में एवं विकासशील देशों में विश्व-भाषा के रूप में प्रकाशमान संस्कृत भाषा के अध्ययन अध्यापन, अन्वेषण एवं अनुशीलन में विश्व विख्यात अध्ययनशील विद्यानुरागी विद्वानों द्वारा आजीवन बड़े प्रयत्न किये जा रहे हैं। इस भारत भूमि में संस्कृत के अध्ययन-अध्यापन की परम्परा इतिहास काल के पूर्व से आज तक अनवरत अविच्छिन्न रूप से चली आ रही है। आदि काल से ही इस भाषा के प्रति लोगों की ऐसी ही आदरपूर्ण एवं श्रद्धापूर्ण पूतभावना विद्यमान रही है। इस भाषा के ज्ञाता, इसके कुशल वक्तागण एवं छात्र पूज्य भावना से समादृत होते रहे हैं।

आज भी राष्ट्र के वहुसंख्यक शिक्षित, अल्प शिक्षित तथा निरक्षर जन की भी आदरमयी आस्था इस संस्कृत भाषा के प्रति वनी हुई है। जहाँ तहाँ आधुनिक भावना से प्रभावित स्वाभिमान रहित आत्म विस्मृत भारतीय लोग इस भाषा को तथा इसके अध्ययन-अध्यापन रत छात्र, अध्यापक एवं विद्वानों को अवहेलना की दृष्टि से देखते हैं। ऐसे ही आधुनिक लोग भारतीय संस्कृतज्ञ विद्वानों को "अव्यावहारिक" "अन्धविश्वास परायण" कहकर अपना दुर्भाव प्रकट करते हैं। किन्तु ऐसे तथाकथित प्रगतिवादी भारतीय संस्कार विहीन लोगों का यह कथन अनर्गल एवं मिथ्या प्रलाप ही है।

हमारे वीच जो वैदिक पण्डित हैं वे भूरि-भूरि प्रशंसा के पात्र हैं। हमारे राष्ट्र की जो प्राचीनतम श्रेष्ठातिश्रेष्ठ वैदिक निधि है वह आज तक इन्हीं गुरु परम्परा से शिक्षा प्राप्त करने वाले, विद्वानों द्वारा अत्यधिक प्रयास निष्ठा एवं तपस्या से विशुद्ध छन्दों के स्वरारोहावरोह तथा पद-क्रम जटा-माला-घनादि सहित पाठ करके सुरक्षित की जा रही है। आज भी ये पण्डित

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सस्वर विकृति पाठ में तथा कण्ठस्थ मन्त्रोच्चारण में समर्थ तथा वन्दनीय एवं प्रशंसनीय हैं।

प्रायः सभी संस्कृतानुरागी संस्कृत वाङ्मय की विशालता को जानते हैं। इस संस्कृत भाषा की विस्तार सीमा को न जानने वाले इसे केवल आध्यात्मिक, पारमार्थिक, दार्शनिक, साहित्यक और धार्मिक मात्र मानते हैं। कुछ पाश्चात्य विद्वान् तथा उनके अनुयायी भारतीय जन कौटिल्य के अर्थशास्त्र को देखने के पूर्व यह नहीं जानते थे कि भारतीय वाङ्मय में अर्थशास्त्र भी है। इस कौटिल्य अर्थशास्त्र में समग्र भारतीय राजनीति, अर्थनीति, शासन पद्धति आदि सभी विषयों का समावेश है। इसके अनेक स्थलों पर मनु आदि धर्म संहिता से भिन्न दण्डनीति और शासन परक विचार व्यक्त किये गये हैं। इसमें धर्म अर्थ काम मोक्ष विषयक चिन्तन तथा कला-विज्ञान ज्योतिर्विज्ञान नक्षत्र विज्ञान, आयुर्विज्ञान, स्थापत्य कला, कृषि, वाणिज्य वनस्पति शास्त्रादिका भी विवेचन है। पुराणोपपुराणों में तथा अन्य भिन्न-भिन्न ग्रन्थों में मानव जीवन से सम्बद्ध सभी विषय भली-भांति प्रतिपादित है। महाभारत के शान्ति पर्व, अनुशासन पर्व तथा अन्य स्थलों पर न जाने कितने सन्दर्भों का समावेश है। इस प्रकार संस्कृत वाङ्मय में अलौकिक, पारमार्थिक, आध्यात्मिक और नैर्वाणिक विषयों के साथ तत्कालीन लौकिक आवश्यकताओं के पूरक सभी प्रसंगों का निरूपण है। उन ग्रन्थों में तत्सम्बन्धी विषयों का नीति निर्देश भी किया गया है।

यद्यपि पाश्चात्य विद्वानों ने भारत में अपने शासनकाल के आरम्भ से ही भारत के प्राचीन वाङ्मय के विशेष रूप से वैदिक तथा अन्य वाङ्मय के ग्रन्थों के पूर्ण विवेचन अनुसंधान और अनुशीलन बड़े प्रयास के साथ वैज्ञानिक दृष्टि से किये हैं तथापि उनके मत केवल राजनीति परक ही नहीं वरन् पूर्वाग्रह युक्त दृष्टि से व्यक्त किये गये हैं एवं उनकी भारतीय शास्त्रों की चिन्तन पद्धति भारतीय परम्परा के विपरीत तथा विकृत रूप से संसार के समक्ष प्रदर्शित की गई है। उन्हीं का अनुसरण करने वाले कुछ भारतीय उसी पद्धति को स्वीकार तथा पुष्ट करते हैं।

स्वतन्त्रता प्राप्ति के पश्चात् भारतीय वाङ्मय का अनुशीलन करने वाले विद्वानों के लिए परमावश्यक है कि वे पाश्चात्य अनुशीलित मान्यताओं का समीक्षण एवं अनुशीलन भारतीय परम्परा के अनुसार परिष्कृत एवं नवीन दृष्टि से संशोधन के साथ यथार्थतः करें।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कुछ लोग कहते हैं कि प्राचीन भारत में तथा संस्कृत वाङ्मय में वैज्ञानिक दृष्टिकोण तथा वैज्ञानिक साहित्य का अभाव है। यह बात तथ्यहीन है। गणित शास्त्र में भारत की वैज्ञानिक दृष्टि तथा समीक्षा अद्भुत थी। रेखागणित के ज्ञान-विज्ञान वैदिक काल से ही दृष्टिगत होते हैं। यज्ञ वेदी के निर्माण में रेखागणित का सूक्ष्म ज्ञान प्रकट होता है। खगोल के विज्ञान में आर्यभट्ट वाराह-मिहिर भास्कराचार्य आदि विद्वानों की वैज्ञानिकता आज भी पाश्चात्य विद्वानों द्वारा बार-बार घोषित की जाती है। बीजगणित और दशमलव सिद्धान्त का जन्म इसी राष्ट्र में हुआ था। अङ्कों का ज्ञान भारत से ही अरब देश के माध्यम से विश्व के समस्त देशों में प्रचलित हुआ। आयु-विज्ञान का प्राचीन वैभव समस्त विश्व के देशों में चरक-सुश्रुत आदि ग्रन्थों के माध्यम से विख्यात हुआ। वर्षा विज्ञान-खगोल विज्ञानादि विषयक तथ्य प्राचीन काल में यन्त्रों के अभाव में भी भारतीय विद्वानों ने अपने निरीक्षण परीक्षण द्वारा इन ग्रन्थों में और पुराण आदि में विस्तृत वर्णन किया है। अधिक क्या कहें! चिकित्सा विज्ञान में ताम्र-लौह-स्वर्ण आदि को भस्म बनाकर आज भी औषध रूप में प्रयोग किया जा रहा है जो अत्यन्त आश्चर्य जनक है। समस्त आर्यभाषा का प्रथम कोषग्रन्थ-व्युत्पत्ति निर्वचन ग्रन्थ यास्क-मुनि प्रणीत निरुक्तारण्य ग्रन्थ में परिलक्षित होते हैं। भाषाध्ययन-विषयक व्याकरण विज्ञान में यास्क पाणिनि, कात्यायन, पतञ्जलि आदि के नाम आज भी सभी के द्वारा मूर्धन्य माने जाते हैं।

इसके अतिरिक्त, आज विकसित देश, भौतिक - तकनीकी - रासायनिक-यान्त्रिक आदि विविध विज्ञान में इतने निष्णात हो गये हैं कि वे अपने बुद्धि-बल से चन्द्रलोक के धरातल पर भी पद-निक्षेप करने में समर्थ हैं, अन्तरिक्ष के उपग्रह विषयक बोध बल से सुदूरवर्ती शुक्र-शनि-गुरु-बुध आदि ग्रहों की परिधि तथा उन ग्रहों से सम्बन्धित ज्ञान के आकलन करने में भी समर्थ हैं। धन समृद्धि की दृष्टि से एवं विज्ञान की दृष्टि से उनका सब प्रकार का वैभव कल्पनातीत हो गया हैं। फिर भी वे आज मानसिक सुख शान्ति से रहित मनोविकारों से ग्रस्त, मानसिक तनाव से व्यथित होकर मादक द्रव्यों के सेवन से मानसिक शान्ति चाहते हैं। किन्तु वे इन विकृत साधनों के प्रयोग से मान-सिक शान्ति न पाकर और अधिक व्यथित होते जा रहे हैं।

बहुत से यूरोप अमेरिका आदि के रहने वाले लोग अशान्त होकर मानसिक शान्ति के लिए विदेश में स्थित भारतीय ज्ञान-भक्ति-भजन का उपदेश

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

करने वाले लोगों के आश्रम में पहुंच कर उनके संस्थानों का मानसिक कष्ट के निवारण हेतु उत्सुकतापूर्वक आश्रय लेते हैं।

इसका यही कारण है कि उनकी बुद्धि का वर्धन असीम हो गया है। उनके हृदय आज भी उसी प्रवृत्ति में आवद्ध हैं। लोगों के कल्याण के लिए तथा यथार्थ उन्नति के लिए यह अनिवार्य रूप से आवश्यक है कि जिस प्रकार बुद्धि बल बढ़े, शक्ति प्राप्त हो, समृद्धि की अधिकता हो जाय उसी प्रकार हृदय के मनोभाव, धैर्य क्षमा आदि मानवीय गुणों के परिष्कार एवं संस्कार भी हों। ऐसा होने पर ही सर्व जनहित कारक सुखदायक शिवमय सन्तुलित विकास सम्भव है।

विदेशी लोग मानसिक सुख-शान्ति के लिए अनेक विकसित देशों में संस्कृत वाङ्मय के प्रति बड़ी उत्सुकता की दृष्टि से देख रहे हैं। भारतीय संस्कृति, संस्कृत और भारतीय वाङ्मय उक्त प्रयोजनों की सिद्धि में समर्थ है। इसलिए भारतीय संस्कृति परम्परा का अनुसरण करने वाले सभी भारतीय लोगों को संस्कृत भाषा में निवद्ध मंगलमय लोक-हितकारी कार्यों को दृष्टि में रखकर अपनी भारतीय संस्कृति तथा संस्कृत वाङ्मय के प्रचार और प्रसार के लिए सन्नद्ध हो जाना चाहिये।

उत्तर प्रदेश संस्कृत अकादमी को इस मंगलमय उद्देश्य की पूर्ति के लिए प्रयत्न करना चाहिए। इस अकादमी ने संस्कृत के प्रचार, प्रसार और शास्त्र चिन्तन से सम्बद्ध अनेक संस्कृत-माण्डलिक सम्मेलनों का सम्पादन किया है। तीर्थराज प्रयाग में अर्धकुम्भ के अवसर पर बड़े समारोह के साथ त्रिदिवसीय समारोह सम्पन्न हुआ। उत्तर प्रदेश की राजधानी लखनऊ में वार्षिक समारोह किये गये। अनेक मन्त्रिमण्डल सदस्य और अधिकारियों ने उद्घाटन कार्य सम्पन्न किये हैं। उसी अवसर पर भट्ट नारायण कृत वेणी संहार नाटक का मंचन अकादमी के उपाध्यक्ष डा० शिव शेखर मिश्र के निर्देशन में सम्पन्न हुआ। दर्शकों द्वारा मंचन की भूरि - भूरि प्रशंसा की गयी। अकादमी ने शारदमहोत्सव के अवसर पर नैनीताल क्षेत्र में उसी प्रकार मंचन कार्य सम्पन्न कर महती प्रशस्ति प्राप्त की। सरयू नदी के तट पर परम पवित्र अयोध्यातीर्थ में त्रिदिवसीय मान्डलिक कार्यक्रम सम्पन्न हुआ। नैमिषारण्य में व्यास जयन्ती के अवसर पर उल्लासपूर्ण सफल अधिवेशन दो दिन तक हुआ। श्रावणी पर्व पर वाराणसी में तीन दिन तक सम्मेलन सम्पन्न हुआ हरिद्वार में वहुत रोचक संस्कृत माण्डलिक सम्मेलन दो दिन किया गया। कुमायूं मण्डल में एक

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दिवसीय माण्डलिक संस्कृत सम्मेलन सम्पन्न हुआ। वहाँ माण्डलिक संस्कृत विद्वत् गोष्ठी की गयी।

यह अकादमी संस्कृत वाङ्मय के प्रचार, प्रसार-संवर्धन एवं संरक्षण के लिए पूर्णरूप से कटिबद्ध हैं। इसने स्थापना काल से ही अनेक महत्वपूर्ण कार्य किये हैं। यह अकादमी वैदिक वाङ्मय के उन्नयन में जीवन अर्पित करने वाले वेद के पारायण में कुशल दस प्रादेशिक वैदिक विद्वानों को प्रति वर्ष पुरस्कार समर्पित कर सम्मानित करती है। इसके द्वारा वृद्ध, विपन्न, अवकाश प्राप्त और परम्परागत संस्कृत पंडितों को आर्थिक सहायता प्रदान की जाती है। यह संस्कृत पत्र-पत्रिकाओं को अनुदान द्वारा आर्थिक सहायता करके उनके प्रचार और प्रसार के लिए प्रयत्न करती रहती है। उत्तर प्रदेश के सार्वजनिक पुस्तकालयों के संवर्धन हेतु पुस्तकीय अनुदान वितरित किया जाता है। उत्तर प्रदेश में संस्कृत से सम्बन्धित प्रकाशित ग्रन्थों के लेखों को पुरस्कार समिति की संस्तुति से नियमानुसार पुरस्कार दिये जाते हैं। यह अकादमी प्रदेश के संस्कृत लेखकों को उत्साह वर्धन के लिए उत्कृष्ट पाण्डुलिपियों के प्रकाशनार्थ आंशिक अनुदान देती है।

अकादमी की अपनी प्रकाशन योजना भी है। पं० नेहरू द्वारा लिखित 'आत्म कथा' का संस्कृतानुवाद पं० कमलापति मिश्र द्वारा किया गया है। यह ग्रन्थ शीघ्र ही प्रकाशित होने जा रहा है। श्री गोपाल शास्त्री दर्शन केसरी द्वारा "ऋजु पाणिनीयम्" पुस्तक संस्कृत भाषा की सरल शिक्षा के लिए अष्टाध्यायी के सूत्रों के क्रमानुसार रची गई है। उसके प्रकाशन की योजना भी स्वीकृत की गयी है।

पाण्डुलिपि के संग्रह करने का हमारा विचार है। उत्तर प्रदेश संस्कृत अकादमी ने पाण्डुलिपि के सर्वेक्षण के कार्यक्रम का महत्व स्वीकार कर तदर्थ योजना चलाई है। इस समय हरिद्वार, गोरखपुर और वाराणसी नगरों में अकादमी के सर्वेक्षक पण्डितों के घर-घर जाकर सर्वेक्षण कार्य कर रहे हैं। अकादमी के सर्वेक्षकों ने अनेक महत्वपूर्ण ग्रन्थ प्राप्त किये हैं जिनकी सूचना उनके द्वारा एकत्र की गई है। भारत की संस्कृति की प्रधान नगरी वाराणसी में सबसे अधिक पाण्डुलिपियाँ उपलब्ध हैं। सर्वेक्षकों ने उन सबकी लेख बद्ध सूचना संकलित की है। इस समय भी यह कार्य किया जा रहा है।

इस समय अन्य अनेक योजनायें भी विचाराधीन हैं। स्थान, भवन और धन की सुविधा हो जाने पर वे योजनायें शीघ्र लागू की जायेंगी। हस्तलिखित

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्राचीन ग्रन्थों का संग्रह करना, उन ग्रन्थों की सुरक्षा, संस्कृत वाङ्मय के लिए अनुसंधान-पीठ की स्थापना, उसके उपयुक्त संस्कृत में तथा संस्कृतेतर भाषाओं में लिखे गये प्रकाशित ग्रन्थों के लिए पुस्तकालय की स्थापना तथा बालकों और प्रौढ़ों के शिक्षण की व्यवस्था सरल - रोचक पद्धति से की जायेगी। धन की सुविधा हो जाने पर हमारे सभी कार्यक्रमों का विस्तार होगा। यह संस्कृत अकादमी संस्कृत भाषा के प्रचार और प्रसार के लिए पूर्ण रूप से सन्नद्ध है।

हमारे कार्य का संचालन काल यद्यपि दो वर्ष से भी कम है तथापि संस्कृत अकादमी की कार्य समिति के सदस्यों ने बड़े उत्साह, मनोयोग, आस्था, और विविध प्रयत्नों से समस्त कार्यों के सम्पादन में सहायक होकर हमें अनुगृहीत किया। महामहिम राज्यपाल महोदय के हम अनुगृहीत हैं कि उन्होंने अपने विभिन्न कार्यक्रमों में व्यस्त रहते हुए भी इस समारोह की अध्यक्षता हेतु अपनी अनुमति प्रदान की। मैं अपनी ओर से तथा अकादमी के सदस्यों और अधिकारियों की ओर से महामहिम राज्यपाल महोदय के प्रति तथा मन्त्रि मण्डल के सदस्यों के प्रति आभार प्रकट करता हूँ। मैं पुनः सभी विद्वानों का, संस्कृतानुरागियों का और उपस्थित सभी सज्जनों का बारम्बार स्वागत करते हुए अभिनन्दन करता हूं।

स्वागतकर्त्ता—
करुणापति

पुनार मुद्रक, ११७ नजीराबाद, लखनऊ

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi